

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## प्रथमकाण्डे पञ्चमः प्रश्नः

### पुनराधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

देवासुराः सय्ँयत्ता आसन्ते देवा विजयमुपयन्तोऽग्नौ वामव्ँवसु सन्न्यदधतेदमु नो भवि-
ष्यति यदि नो जेष्यन्तीति तदग्निर्न्यकामयत तेनापा*क्रामत् तद्देवा विजित्या*वरुरुथ्समाना
अन्वायन् तदस्य सहसाऽऽ*दित्सन्त सोऽरोदीद्यदरोदीत् तद् रुद्रस्य रुद्रत्वय्ँयदश्रवशीयत तद्
॥ [१] ॥ रजतꣳ हिरण्यमभवत् तस्माद् रजतꣳ हिरण्यमदक्षिण्यमश्रुजꣳ हि यो बर्हिषि
ददाति पुराऽस्य संवँथ्सराद् गृहे रुदन्ति तस्माद् बर्हिषि न देयꣳ सोऽग्निरब्रवीद् भाग्यसान्यथ
व इदमिति पुनराधेयन्ते केवलमित्यब्रुवन् नृदध्नवत् खलु स इत्यब्रवीद्यो मद्देवत्यमग्निमाद-
धाता इति तम्पूषाऽऽधत्त तेन ॥ [२] ॥ पूषाऽऽर्ध्नोत् तस्मात् पौष्णाः पशव उच्यन्ते तन्त्व-
ष्टाऽऽधत्त तेन त्वष्टाऽऽर्ध्नोत् तस्मात् त्वाष्ट्राः पशव उच्यन्ते तम्मनुराऽधत्त तेन मनुरार्ध्नोत्
तस्मान्मानव्यः प्रजा उच्यन्ते तन्धाताऽऽ*धत्त तेन धाताऽऽ*र्ध्नोथ् सव्ँवथ्सरो वै धाता
तस्माथ् सव्ँवथ्सरम्प्रजाः पशवोऽनु प्र जायन्ते य एवम्पुनराधेयस्यर्द्धिव्ँवेद ॥ [३] ॥ दर्ध्नोत्येव
योऽस्यैवम्बन्धुताव्ँवेद बन्धुमान् भवति भागधेयव्ँवा अग्निराहित इच्छमानः प्रजाम्पशून् यजमा-
नस्योप दोद्रावोद्वास्य पुनरा दधीत भागधेयेनैवैनꣳ समर्द्धयत्यथो शान्तिरेवास्यैषा पुनर्वस्वोरा
दधीतैतद्वै पुनराधेयस्य नक्षत्रय्ँयत् पुनर्वसू स्वायामेवैनन्देवतायामाधाय ब्रह्मवर्चसी भवति दर्भै
रा दधात्ययातयामत्वाय दर्भैरा दधात्यद्भ्य एवैनमोषधीभ्योऽवरुद्ध्याऽऽ*धत्ते पञ्चकपालः पुरो-
डाशो भवति पञ्च वा ऋतव ऋतुभ्य एवैनमवरुद्ध्याऽऽ*धत्ते ॥ [४] ॥

(अशीयत तत् तेनवेद दर्भैः पञ्चविꣳशतिश्च) ॥ १ ॥

परा वा एष यज्ञम्पशून् वपति योऽग्निमुद्वासयते पञ्चकपालः पुरोडाशो भवति पाङ्क्तो यज्ञः पाङ्क्ताः पशवो यज्ञमेव पशूनव रुन्धे वीरहा वा एष देवानाँय्योँऽग्निमुद्वासयते न वा एतस्य ब्राह्मणा ऋतायवः पुराऽन्नमख्षन् पङ्क्त्यो याज्यानुवाक्या भवन्ति पाङ्क्तो यज्ञः पाङ्क्तः पुरुषो देवानेव वीरन्नि-
रवदायाग्निम्पुनरा ॥ [५] ॥ धत्ते शताख्षरा भवन्ति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठति यद्वा अग्निराहितो नर्ध्यते ज्यायो भागधेयन्निकामयमानो यदाग्नेयꣳ सर्वम्भवति सैवास्यर्द्धिः सँव्वा एतस्य गृहे वाक् सृज्यते योऽग्निमुद्वासयते स वाचꣳ सꣳसृष्टाँय्यजमान ईश्व-
रोऽनु पराभवितोर् विभक्तयो भवन्ति वाचो विधृत्यै यजमानस्यापराभावाय ॥ [६] ॥ विभ-
क्तिङ्करोति ब्रह्मैव तदकरुपाꣳशु यजति यथा वामँव्वसु विविदानो गूहति तादृगेव तदग्निम्प्रति स्विष्टकृतन्निराह यथा वामँव्वसु विविदानः प्रकाशञ्जिगमिषति तादृगेव तद्विभक्तिमुक्त्वा प्रयाजेन वषट्करोत्यायतनादेव नैति यजमानो वै पुरोडाशः पशव एते आहुती यदभितः पुरोडाशमेते
आहुती ॥ [७] ॥ जुहोति यजमानमेवोभयतः पशुभिः परि गृह्णाति कृतयजुः संभृतसंभार इत्याहुर्न संभृत्याः संभारा न यजुः कर्तव्यमित्यथो खलु संभृत्या एव संभाराः कर्तव्यँय्यजुर् यज्ञस्य समृद्ध्यै पुनर्निष्कृतो रथो दख्षिणा पुनरुथ्स्यूतँव्वासः पुनरुथ्सृष्टोऽनड्वान् पुनराधेयस्य समृद्ध्यै सप्त ते अग्ने समिधः सप्त जिह्वा इत्यग्निहोत्रञ्जुहोति यत्रयत्रैवास्य न्यक्तन्तत ॥ [८] ॥
एवैनमव रुन्धे वीरहा वा एष देवानाँय्योँऽग्निमुद्वासयते तस्य वरुण एवर्णयादाग्निवारुणमेकाद-
शकपालमनु निर्वपेद्यञ्चैव हन्ति यश्चास्यर्णयात्तौ भागधेयेन प्रीणाति नाऽऽर्तिमार्च्छति यज-
मानः ॥ [९] ॥

(आऽपराभावायपुरोडाशमेतेआहुतीततः षट्त्रिꣳशच्च) ॥ २ ॥

भूमिर् भूम्ना द्यौर् वरिणाऽन्तरिख्षम्महित्वा। उपस्थे ते देव्यदितेऽग्निमन्नादमन्नाद्या-
याऽऽदधे॥ आऽयङ्गौः पृश्निरक्रमीदसनन् मातरम्पुनः। पितरञ्च प्रयन्थ् सुवः॥ त्रिꣳशद्धाम

वि राजति वाक् पतङ्गाय शिश्रिये। प्रत्यस्य वह द्युभिः॥ अस्य प्राणादपानत्यन्तश्चरति रोचना। व्यख्यन् महिषः सुवः॥ यत्त्वा ॥ [१०] ॥ क्रुद्धः परोवप मन्युना यदवर्त्या। सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि॥ यत्ते मन्युपरोप्तस्य पृथिवीमनु दद्ध्वसे। आदित्या विश्वे तद्देवा वसवश्च समाभरन्न्॥ मनो ज्योतिर् जुषतामाज्यँव्विच्छिन्नय्यँज्ञꣳ समिमन्दधातु। बृहस्पतिस्त-नुतामिमन्नो विश्वे देवा इह मादयन्ताम्॥ सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त ॥ [११] ॥ ऋषयः सप्त धाम प्रियाणि। सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरा पृणस्वा घृतेन॥ पुनरूर्जा नि वर्तस्व पुनरग्न इषाऽऽ*युषा। पुनर्नः पाहि विश्वतः॥ सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया। विश्वप्स्निया विश्वतस्परि॥ लेकः सलेकः सुलेकस्ते न आदित्या आज्यञ्जुषाणा वियन्तु केतः सकेतः सुकेतस्ते न आदित्या आज्यञ्जुषाणा वियन्तु विवस्वाꣳ अदितिर् देवजूतिस्ते न आदित्या आज्यञ्जुषाणा वियन्तु ॥ [१२] ॥

(त्वाजिह्वाः सप्तसुकेतस्ते नत्रयोदश च) ॥ ३ ॥

भूमिर् भूम्ना द्यौर् वरिणेत्याहाऽऽशिषैवैनमा धत्ते सर्पा वै जीर्यन्तोऽमन्यन्त स एतं कस-र्णीरः काद्रवेयो मन्त्रमपश्यत् ततो वै ते जीर्णास्तनूरपाघ्नत सर्पराज्ञिया ऋग्भिर् गार्हपत्यमा दधाति पुनर्नवमेवैनमजरङ्कृत्वाऽऽ*धत्तेऽथो पूतमेव पृथिवीमन्नाद्यन्नोपानमत्सैतं ॥ [१३] ॥ मन्त्रमपश्यत् ततो वै तामन्नाद्यमुपानमद्यथ् सर्पराज्ञिया ऋग्भिर् गार्हपत्य मादधात्यन्ना-द्यस्यावरुद्ध्या अथो अस्यामेवैनम्प्रतिष्ठितमा धत्ते यत्त्वा क्रुद्धः परोवपेत्याहापह्नुत एवास्मै तत् पुनस्त्वोद्दीपयामसीत्याह समिन्ध एवैनय्यँत्ते मन्युपरोप्तस्येत्याह देवताभिरेवै ॥ [१४] ॥ नꣳ सम्भरति वि वा एतस्य यज्ञश्छिद्यते योऽग्निमुद्वासयते बृहस्पतिवत्यर्चोप तिष्ठते ब्रह्म वै देवानाम्बृहस्पतिर् ब्रह्मणैव यज्ञꣳ सन्दधाति विच्छिन्नय्यँज्ञꣳ समिमन्दधात्वित्याह सन्तत्यै विश्वे देवा इह मादयन्तामित्याह सन्तत्यैव यज्ञन्देवेभ्योऽनु दिशति सप्त ते अग्ने समिधः सप्त जिह्वा ॥ [१५] ॥ इत्याह सप्तसप्त वै सप्तधाऽग्नेः प्रियास्तनुवस्ता एवाव रुन्धे पुनरूर्जा सह रय्येत्यभितः पुरोडाशमाहुती जुहोति यजमानमेवोर्जा च रय्या चोभयतः परि गृह्णात्यादित्या वा अस्माल्लोकादमुँल्लोकमायन् तेऽमुष्मिँल्लोके व्यतृष्यन् त इमँल्लोकम्पुनरभ्यवेत्याऽग्निमाधा-

यैतान्होमानजुहवुस्त आर्द्धुवन् ते सुवर्गँल्लोकमायन्यः पराचीनम्पुनराधेयादग्निमादधीत स एतान्होमान् जुहुयाद्यामेवाऽऽ*दित्या ऋद्धिमार्द्धुवन् तामेवद्र्ध्नोति ॥ [१६] ॥

(सैतंदेवताभिरेवजिह्वाएतान्पञ्चविंशतिश्च) ॥ ४ ॥

उपप्रयन्तो अद्ध्वरम्मन्त्रँव्वोचेमाग्नये। आरे अस्मे च शृण्वते॥ अस्य प्रत्नामनु द्युतꣳ शुक्रन्दुदुह्रे अह्रयः। पयः सहस्रसामृषिम्॥ अग्निर् मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपाꣳ रेताꣳसि जिन्वति॥ अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः॥ यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रँव्विभ्वँव्विशेविशे॥ उभा वामिन्द्राग्नी आहुवद्ध्या ॥ [१७] ॥ उभा राधसः सह मादयद्ध्यै। उभा दातारविषाꣳ रयीणामुभा वाजस्य सातये हुवे वाम्॥ अयन्ते योनिर्ऋत्वियो यतो जातो अरोचथाः। तञ्जानन्नग्न आ रोहाथा नो वर्द्धया रयिम्॥ अग्न आयूꣳषि पवस आ सुवोर्जमिषञ्च नः। आरे बाधस्व दुच्छुनाम्॥ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम्। दधत्पोषꣳ रयिं ॥ [१८] ॥ मयि॥ अग्ने पावक रोचिषा मन्द्रया देव जिह्वया। आ देवान्वक्षि यक्षि च॥ स नः पावक दीदिवोऽग्ने देवाꣳ इहाऽऽ*वह। उप यज्ञꣳ हविश्च नः॥ अग्निः शुचिव्रततमः शुचिर् विप्रः शुचिः कविः। शुची रोचत आहुतः॥ उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते। तव ज्योतीꣳष्यर्चयः॥ आयुर्दा अग्नेऽस्यायुर्मे ॥ [१९] ॥ देहि वर्चोदा अग्नेऽसि वर्चो मे देहि तनूपा अग्नेऽसि तनुवम्मे पाह्यग्ने यन्मे तनुवा ऊनन्तन्म आ पृण चित्रावसो स्वस्ति ते पारमशीयेन्धानास्त्वा शतꣳ हिमा द्युमन्तः समिधीमहि वयस्वन्तो वयस्कृतय्यँशस्वन्तो यशस्कृतꣳ सुवीरासो अदाभ्यम्। अग्ने सपत्नदम्भनव्वँर्षिष्ठे अधि नाके॥ सन्त्वमग्ने सूर्यस्य वर्चसा ऽगथाः समृषीणाꣳ स्तुतेन सम्प्रियेण धाम्ना। त्वमग्ने सूर्यवर्चा असि सम्मामायुषा वर्चसा प्रजया सृज ॥ [२०] ॥

(आहुवद्ध्यैपोषꣳ रयिंमेवर्चसासप्तदश च) ॥ ५ ॥

सम्पश्यामि प्रजा अहमिडप्रजसो मानवीः। सर्वा भवन्तु नो गृहे। अम्भः स्थाम्भो वो भक्षीय महः स्थ महो वो भक्षीय सहः स्थ सहो वो भक्षीयोर्जः स्थोर्जँव्वो भक्षीय रेवती रमद्ध्व-

मस्मिँल्लोकेऽस्मिन् गोष्ठेऽस्मिन् क्षयेऽस्मिन् योनाविहैव स्तेतो माऽप गात बह्वीर्मे भूयास्त ॥ [२१] ॥ सꣳहिताऽसि विश्वरूपीरा मोर्जा विशाऽऽ*गौपत्येनाऽऽ*रायस्पोषेण सहस्रपो-षँवः पुष्यासम्मयि वो रायः श्रयन्ताम्॥ उप त्वाऽग्ने दिवेदिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसि॥ राजन्तमद्ध्वराणाङ्गोपामृतस्य दीदिविम्। वर्द्धमानꣳ स्वे दमे॥ स नः पितेव सूनवेऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये॥ अग्ने ॥ [२२] ॥ त्वन्नो अन्तमः। उत त्राता शिवो भव वरूथ्यः॥ तन्त्वा शोचिष्ठ दीदिवः। सुम्नाय नूनमीमहे सखिभ्यः॥ वसुरग्निर् वसु-श्रवाः। अच्छा नक्षि द्युमत्तमो रयिन्दाः॥ ऊर्जा वः पश्याम्यूर्जा मा पश्यत रायस्पोषेण वः पश्यामि रायस्पोषेण मा पश्यतेडाः स्थ मधुकृतः स्योना माऽऽविशतेरा मदः। सहस्रपोषँवः पुष्यासं ॥ [२३] ॥ मयि वो रायः श्रयन्ताम्॥ तथ्सवितुर् वरेण्यम्भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥ सोमानꣳ स्वरणङ्कृणुहि ब्रह्मणस्पते। कक्षीवन्तँय्य औशिजम्॥ कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे॥ उपोपेन्नु मघवन् भूय इन्नु ते दानन्देवस्य पृच्यते॥ परि त्वाऽग्ने पुरँव्वयँव्विप्रꣳ सहस्य धीमहि॥ धृषद्वर्णन्दिवेदिवे भेत्तारम्भङ्गुरावतः॥ अग्ने गृहपते सुगृहप-तिरहन्त्वया गृहपतिना भूयासꣳ सुगृहपतिर्मया त्वङ्गृहपतिना भूयाः शतꣳ हिमास्तामाशिषमा शासे तन्तवे ज्योतिष्मतीन्तामाशिषमा शासेऽमुष्मै ज्योतिष्मतीम् ॥ [२४] ॥

(भूयास्तस्वस्तयेऽग्नेपुष्यासंधृषद्वर्णमेकान्नत्रिꣳशच्च) ॥ ६ ॥

---

अयज्ञो वा एष योऽसामोपप्रयन्तो अद्ध्वरमित्याह स्तोममेवास्मै युनक्त्युपेत्याह प्रजा वै पशव उपेमँल्लोकम्प्रजामेव पशूनिमँल्लोकमुपैत्यस्य प्रत्नामनु द्युतमित्याह सुवर्गो वै लोकः प्रत्नः सुवर्गमेव लोकꣳ समारोहत्यग्निर् मूर्द्धा दिवः ककुदित्याह मूर्द्धानं ॥ [२५] ॥ मेवैनꣳ समा-नानाङ्करोत्यथो देवलोकादेव मनुष्यलोके प्रति तिष्ठत्ययमिह प्रथमो धायि धातृभिरित्याह मुख्य-मेवैनङ्करोत्युभा वामिन्द्राग्नी आहुवद्ध्या इत्याहौजो बलमेवाव रुन्धेऽयन्ते योनिर्ऋत्विय इत्याह पशवो वै रयिः पशूनेवाव रुन्धे षड्भिरुप तिष्ठते षड्वा ॥ [२६] ॥ ऋतव ऋतुष्वेव प्रति तिष्ठति षड्भिरुत्तराभिरुप तिष्ठते द्वादश सम्पद्यन्ते द्वादश मासाः सँव्वथ्सरः सँव्वथ्सर एव प्रति तिष्ठति यथा वै पुरुषोऽश्वो गौर्जीर्यत्येवमग्निराहितो जीर्यति सँव्वथ्सरस्य परस्तादाग्निपावमानीभिरुप

तिष्ठते पुनर्नवमेवैनमजरङ्करोत्यथो पुनात्येवोप तिष्ठते योग एवास्यैष उप तिष्ठते ॥ [२७] ॥ दम एवास्यैष उप तिष्ठते याञ्जैवास्यैषोप तिष्ठते यथा पापीयाञ्छ्रेयस आहृत्य नमस्यति तादृगेव तदायुर्दा अग्नेऽस्यायुर्मे देहीत्याहा*ऽऽयुर्दा ह्येष वर्चोदा अग्नेऽसि वर्चो मे देहीत्याह वर्चोदा ह्येष तनूपा अग्नेऽसि तनुवम्मे पाहीत्याह ॥ [२८] ॥ तनूपा ह्येषोऽग्ने यन्मे तनुवा ऊनन्तन्म आ पृणेत्याह यन्मे प्रजायै पशूनामूनन्तन्म आ पूरयेति वावैतदाह चित्रावसो स्वस्ति ते पारमशीयेत्याह रात्रिर् वै चित्रावसुरव्युष्ट्यै वा एतस्यै पुरा ब्राह्मणा अभैषुर् व्युष्टिमेवाव रुन्ध इन्धानास्त्वा शतꣳ ॥ [२९] ॥ हिमा इत्याह शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्येषा वै सूर्मी कर्णकावत्येतया ह स्म वै देवा असुराणाꣳ शततर्हाꣳ स्तृꣳहन्ति यदेतया समिधमादधाति वज्रमेवैतच्छतघ्नीय्यँजमानो भ्रातृव्याय प्र हरति स्तृत्या अछम्बट्कारꣳ सन्त्वमग्ने सूर्यस्य वर्चसाऽगथा इत्याहैतत्त्वमसीदमहं भूयासमिति वावैतदाह त्वमग्ने सूर्यवर्चा असीत्याहाऽऽशिषमेवैतामा शास्ते ॥ [३०] ॥

(मूर्द्धानꣳषड्वाएष उप तिष्ठतेपाहीत्याहशतमहꣳ षोडश च) ॥ ७ ॥

सम्पश्यामि प्रजा अहमित्याह यावन्त एव ग्राम्याः पशवस्तानेवाव रुन्धेऽम्भः स्थाम्भो वो भक्षीयेत्याहाम्भो ह्येता महः स्थ महो वो भक्षीयेत्याह महो ह्येताः सहः स्थ सहो वो भक्षीयेत्याह सहो ह्येता ऊर्जः स्थोर्जव्वो भक्षीयेत्या ॥ [३१] ॥ होर्जो ह्येता रेवती रमद्ध्वमित्याह पशवो वै रेवतीः पशूनेवात्मन् रमयत इहैव स्तेतो माऽप गातेत्याह ध्रुवा एवैना अनपगाः कुरुत इष्टकचिद्वा अन्योऽग्निः पशुचिदन्यः सꣳहितासि विश्वरूपीरिति वथ्समभि मृशत्युपैवैनन्धत्ते पशुचितमेनङ्कुरुते प्र ॥ [३२] ॥ वा एषोऽस्माल्लोकाच्च्यवते य आहवनीयमुपतिष्ठते गार्हपत्यमुप तिष्ठतेऽस्मिन्नेव लोके प्रति तिष्ठत्यथो गार्हपत्यायैव नि ह्नुते गायत्रीभिरुप तिष्ठते तेजो वै गायत्री तेज एवात्मन् धत्तेऽथो यदेतन्तृचमन्वाह सन्तत्यै गार्हपत्यव्वा अनु द्विपादो वीराः प्र जायन्ते य एवव्विद्वान् द्विपदाभिर् गार्हपत्यमुपतिष्ठत ॥ [३३] ॥ आऽस्य वीरो जायत ऊर्जा वः पश्याम्यूर्जा मा पश्यतेत्याहाऽऽशिषमेवैतामा शास्ते तथ्सवितुर् वरेण्यमित्याह प्रसूत्यै सोमानꣳ स्वरणमित्याह सोमपीथमेवाव रुन्धे कृणुहि ब्रह्मणस्पत इत्याह ब्रह्मव-

र्चसमेवाव रुन्धे कदा चन स्तरीरसीत्याह न स्तरीꣳ रात्रिँव्वसति ॥ [३४] ॥ य एवँव्विद्वान-
ग्निमुपतिष्ठते परि त्वाऽग्ने पुरँव्वयमित्याह परिधिमेवैतम्परि दधात्यस्कन्दायाग्ने गृहपत इत्याह
यथायजुरेवैतच्छतꣳ हिमा इत्याह शतन्त्वा हेमन्तानिन्धिषीयेति वावैतदाह पुत्रस्य नाम गृह्णा-
त्यन्नादमेवैनङ्करोति तामाशिषमा शासे तन्तवे ज्योतिष्मतीमिति ब्रूयाद्यस्य पुत्रोऽजातः स्यात्
तेजस्व्येवास्य ब्रह्मवर्चसी पुत्रो जायते तामाशिषमा शासेऽमुष्मै ज्योतिष्मती मिति ब्रूयाद्यस्य
पुत्रो जातः स्यात् तेज एवास्मिन् ब्रह्मवर्चसन्दधाति ॥ [३५] ॥

(ऊर्जँव्वो भरुषीयेति प्र गार्हपत्यमुपतिष्ठते वसतिज्योतिष्मती मेकान्नत्रिꣳशच्च) ॥ ८ ॥

अग्निहोत्रञ्जुहोति यदेव किञ्च यजमानस्य स्वन्तस्यैव तद्रेतः सिञ्चति प्रजनने प्रजननꣳ हि वा
अग्निरथौषधीरन्तर्गता दहति तास्ततो भूयसीः प्र जायन्ते यथ्सायञ्जुहोति रेत एव तथ्सिञ्चति
प्रैव प्रातस्तनेन जनयति तद्रेतः सिक्तन्न त्वष्ट्राऽविकृतम्प्रजायते यावच्छो वै रेतसः सिक्तस्य
॥ [३६] ॥ त्वष्टा रूपाणि विकरोति तावच्छो वै तत्प्र जायत एष वै दैव्यस्त्वष्टा यो यजते
बह्वीभिरुप तिष्ठते रेतस एव सिक्तस्य बहुशो रूपाणि वि करोति स प्रैव जायते श्वःश्वो भूयान्
भवति य एवं विद्वानग्निमुपतिष्ठतेऽहर्देवानामासीद् रात्रिरसुराणान्तेऽसुरा यद्देवानाँव्वित्तँव्वेद्य-
मासीत्तेन सह ॥ [३७] ॥ रात्रिम्प्राऽ*विशन्ते देवा हीना अमन्यन्त तेऽपश्यन्नाग्नेयी रात्रिरा-
ग्नेयाः पशव इममेवाग्निꣳ स्तवाम स नः स्तुतः पशून् पुनर्दास्यतीति तेऽग्निमस्तुवन्थ् स एभ्यः
स्तुतो रात्रिया अद्ध्यहरभि पशून्निरार्जत्ते देवाः पशून् वित्त्वा कामाꣳ अकुर्वत य एवँव्विद्वानग्नि-
मुपतिष्ठते पशुमान् भव ॥ [३८] ॥ त्यादित्यो वा अस्माल्लोकादमुँल्लोकमैथ्सोऽमुँल्लोकङ्गत्वा
पुनरिमँल्लोकमभ्यद्ध्यायथ् स इमँल्लोकमागत्य मृत्योरबिभेन्मृत्युसँय्युत इव ह्ययँल्लोकः सोऽम-
न्यतेममेवाग्निꣳ स्तवानि स मा स्तुतः सुवर्गँल्लोकङ्गमयिष्यतीति सोऽग्निमस्तौथ् स एनꣳ स्तुतः
सुवर्गँल्लोकमगमयद्य ॥ [३९] ॥ एवँव्विद्वानग्निमुपतिष्ठते सुवर्गमेव लोकमेति सर्वमायुरेत्यभि
वा एषोऽग्नी आ रोहति य एनावुपतिष्ठते यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति
नक्तमुप तिष्ठते न प्रातः सꣳ हि नक्तँव्व्रतानि सृज्यन्ते सह श्रेयाꣳश्च पापीयाꣳश्चासाते ज्योतिर्वा
अग्निस्तमो रात्रिर्य ॥ [४०] ॥ न्नक्तमुपतिष्ठते ज्योतिषैव तमस्तरत्युपस्थेयोऽग्नी(३)र् नोप-

स्थेया(३) इत्याहुर् मनुष्यायेन्वै योऽहरहराहृत्याऽथैनय्ँयाचति स इन्वै तमुपार्च्छत्यथ को देवा-नहरहर्याचिष्यतीति तस्मान्नोपस्थेयोऽथो खल्वाहुराशिषे वै कय्ँयजमानो यजत इत्येषा खलु वा ॥ [४१] ॥ आहिताग्नेराशीर् यदग्निमुपतिष्ठते तस्मादुपस्थेयः प्रजापतिः पशूनसृजत ते सृष्टा अहोरात्रे प्राऽ*विशन् ताञ्छन्दोभिरन्वविन्दद्यच्छन्दोभिरुपतिष्ठते स्वमेव तदन्विच्छति न तत्र जाम्यस्तीत्याहुर्योऽहरहरुप तिष्ठत इति यो वा अग्निम्प्रत्यङ्ङुप तिष्ठते प्रत्येनमोषति यः पराङ्विष्वङ् प्रजया पशुभि रेति कवातिर्यङ्ङिवोप तिष्ठेत नैनम्प्रत्योषति न विष्वङ् प्रजया पशु-भिरेति ॥ [४२] ॥

(सिक्तस्यसहभवतियोयत्खलु वैपशुभिस्त्रयोदश च) ॥ ९ ॥

मम नाम प्रथमञ्जातवेदः पिता माता च दधतुर्यदग्रे। तत्त्वम्बिभृहि पुनरा मदैतोस्तवाहन्नाम बिभराण्यग्ने॥ मम नाम तव च जातवेदो वाससी इव विवसानौ ये चरावः। आयुषे त्वञ्जीवसे वयय्ँयथायथव्ँवि परि दधावहै पुनस्ते॥ नमोऽग्नयेऽप्रतिविद्धाय नमोऽनाधृष्टाय नमः सम्राजे। अषाढो ॥ [४३] ॥ अग्निर्बृहद्वया विश्वजिथ् सहन्त्यः श्रेष्ठो गन्धर्वः। त्वत्पितारो अग्ने देवा-स्त्वामाहुतयस्त्वद्विवाचनाः। सम्मामायुषा सङ्गौपत्येन सुहिते मा धाः॥ अयमग्निः श्रेष्ठतमोऽय-म्भगवत्तमोऽयꣳ सहस्रसातमः। अस्मा अस्तु सुवीर्यम्॥ मनो ज्योतिर् जुषतामाज्यव्ँविच्छि-न्नय्ँयज्ञꣳ समिमन्दधातु। या इष्टा उषसो निम्रुचश्च ताः सन्दधामि हविषा घृतेन॥ पयस्वतीरो-षधयः ॥ [४४] ॥ पयस्वद्वीरुधाम्पयः। अपाम्पयसो यत्पयस्तेन मामिन्द्र सꣳ सृज॥ अग्ने व्रतपते व्रतञ्चरिष्यामि तच्छकेयन्तन्मे राध्यताम्॥ अग्निꣳ होतारमिह तꣳ हुवे देवान्यज्ञि-यानिह यान्हवामहे॥ आ यन्तु देवाः सुमनस्यमाना वियन्तु देवा हविषो मे अस्य॥ कस्त्वा युनक्ति स त्वा युनक्तु यानि घर्मे कपालान्युपचिन्वन्ति ॥ [४५] ॥ वेधसः। पूष्णस्तान्यपि व्रत इन्द्रवायू वि मुञ्चताम्॥ अभिन्नो घर्मो जीरदानुर्यत आत्तस्तदगन् पुनः। इद्ध्मो वेदिः परिधयश्च सर्वे यज्ञस्याऽऽयुरनु सञ्चरन्ति॥ त्रयस्त्रिꣳशत् तन्तवो ये वितत्निरे य इमय्ँयज्ञꣳ स्वधया ददन्ते तेषाञ्छिन्नम्प्रत्येतद्दधामि स्वाहा घर्मो देवाꣳ अप्येतु ॥ [४६] ॥

(अषाढओषधयौपचिन्वन्तिपञ्चचत्वारिꣳशच्च) ॥ १० ॥

वैश्वानरो न ऊत्याऽऽप्र यातु परावतः। अग्निरुक्थेन वाहसा॥ ऋतावानँव्वैश्वानरमृ-
तस्य ज्योतिषस्पतिम्। अजस्रङ्घर्ममीमहे॥ वैश्वानरस्य दꣳसनाभ्यो बृहदरिणादेकः स्वपस्यया
कविः। उभा पितरा महयन्नजायताग्निर् द्यावापृथिवी भूरिरेतसा॥ पृष्टो दिवि पृष्टो अग्निः पृथि-
व्याम्पृष्टो विश्वा ओषधीरा विवेश। वैश्वानरः सहसा पृष्टो अग्निः सनो दिवा स ॥ [४७] ॥
रिषः पातु नक्तम्॥ जातो यदग्ने भुवना व्यख्यः पशुन्न गोपा इर्यः परिज्मा। वैश्वानर ब्रह्मणे
विन्द गातुय्ँयूयम्पात स्वस्तिभिः सदा नः॥ त्वमग्ने शोचिषा शोशुचान आ रोदसी अपृणा
जायमानः। त्वन्देवाꣳ अभिशस्तेरमुञ्चो वैश्वानर जातवेदो महित्वा॥ अस्माकमग्ने मघवत्सु
धारयानामि क्षत्रमजरꣳ सुवीर्यम्। वयञ्जयेम शतिनꣳ सहस्रिणँव्वैश्वानर ॥ [४८] ॥ वाज-
मग्ने तवोतिभिः॥ वैश्वानरस्य सुमतौ स्याम राजा हिकम्भुवनानामभिश्रीः। इतो जातो विश्व-
मिदव्ँवि चष्टे वैश्वानरो यतते सूर्येण॥ अव ते हेडो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः।
क्षयन्नस्मभ्यमसुर प्रचेतो राजन्नेनाꣳसि शिश्रथः कृतानि॥ उदुत्तमव्ँवरुण पाशमस्मदवाऽध-
मव्ँविमध्यमꣳ श्रथाय। अथा वयमादित्य ॥ [४९] ॥ व्रते तवाऽनागसो अदितये स्याम॥
दधिक्राव्ण्णो अकारिषञ्जिष्णोरश्वस्य वाजिनः॥ सुरभिनो मुखा करत् प्रण आयूꣳषि तारिषत्॥
आ दधिक्राः शवसा पञ्च कृष्टीः सूर्य इव ज्योतिषाऽपस्ततान। सहस्रसाः शतसा वाज्यर्वा पृणक्तु
मद्ध्वा समिमा वचाꣳसि। अग्निर् मूर्द्धा>१, भुवः>२। मरुतो यद्धवो दिवः सुम्नायन्तो हवामहे।
आ तू न ॥ [५०] ॥ उप गन्तन॥ या वः शर्म शशमानाय सन्ति त्रिधातूनि दाशुषे यच्छ-
ताधि। अस्मभ्यन्तानि मरुतो वि यन्त रयिन्नो धत्त वृषणः सुवीरम्॥ अदितिर् न उरुष्यत्वदितिः
शर्म यच्छतु। अदितिः पात्वꣳहसः॥ महीमूषु मातरꣳ सुव्रतानामृतस्य पत्नीमवसे हुवेम। तुवि-
क्षत्रामजरन्तीमुरूचीꣳ सुशर्माणमदितिꣳ सुप्रणीतिम्॥ सुत्रामाणम्पृथिवीन्द्यामनेहसꣳ सुश-
र्माण मदितिꣳ सुप्रणीतिम्। दैवीन्नावꣳ स्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये॥ इमाꣳ
सु नावमाऽरुहꣳ शतारित्राꣳ शतस्फ्याम्। अच्छिद्राम्पारयिष्णुम् ॥ [५१] ॥

(दिवा सꣳसहस्रिणँव्वैश्वानरादित्य तू नो ऽनेहसꣳ सुशर्माणमेकान्नविꣳशतिश्च) ॥ ११ ॥

## समाप्ति कोर्वैः

(दे॒वा॒सु॒राःपरा॒भूमि॒र्भूमि॑रुपप्र॒यन्त॒ःसम्प॑श्या॒म्यय॑ज्ञ॒ः सम्प॑श्या म्यग्नि॑हो॒त्रं मम॒ नाम॑वैश्वान॒रेका॑दश)
(दे॒वा॒सु॒राःक्रु॒द्धःसम्प॑श्यामि॒सम्प॑श्यामि॒नक्त॒मुप॑गन्त॒नैक॑पञ्चा॒शत्)
(दे॒वा॒सु॒राःपा॑रयि॒ष्णुं)

॥ हरिः ॐ ॥

**प्रथमकाण्डे पञ्चमः प्रश्नः समाप्तः**

| अनुवाकाः | पञ्चशत्यः |
| --- | --- |
| ११ | ५१ |

ॐ